Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# राजशेखर कवेः कर्पूरमञ्जरी सट्टकम्

**Dr. M. SURESH**
Cell: 9000500502
Email: mannurusuresh5@gmail.com

## प्रस्तावना

''येनास्मिन् अतिविचित्र परम्परावाहिनि संसारे कालिदासप्रभृतयः द्वित्राः पञ्चषा वा महाकवयः इति गण्यते'' इति बदता ध्वनिकारेण आनन्दवर्धनेन संस्कृतसाहित्ये महाकविनां संख्या विरलीकृता । कालिदासः - भारविः - माघः - श्रहिर्षः इत्यादीनां केषाञ्चन नामान्येव प्रसिद्दानि तेषामेव काव्यानामपि प्रचारः लोके अतितरं वर्तते । एवं स्थिते तत्सदृशाः एवं विधाः महाकवयः प्राचीनैः आलङ्कारिकेरेव बहुभिः श्लाधिताः इतरेपि वर्तन्ते । तेष्वन्यतमस्य राजशेखरस्य परिचयः तेन कृतं कर्पूरमञ्जरी नाम सट्टकं च नूतनं विशिष्टं च दृश्यते इति तत्परिचयः अस्मिन् पत्रे प्रस्तूयते ।

## राजशेखरस्य काल :-

राजशेखरः नवमे दशके वा ईशवीय शतके आसीदिति वाङ्मय चरित्रकाराणामभिप्रायः । यतः राजशेखरः स्वयं आत्मानं भवभूतेः जन्मान्तररूपं मेने । अपि च काव्यप्रकाशादि लक्षणग्रन्थेषु राजशेखरस्य श्लोकाः बहवे उदाहृताः इति ए.डि. नवमे शतके आसीदिति निश्चेतुं शक्यते ।

बालभारतनाटके राजशेखरस्य परिचयः एवं दृश्यते । ......(A)

बभूव वल्मीकिभवः पुरा कविस्ततः प्रपेदे भुवि भर्त्तृमेण्ठताम् ।

स्थितः पुनर्यो भवभूतिरेखया स वर्त्तते सम्प्रति राजशेखरः ।।

## राजशेखरस्य काव्यानि :-

1. हरविलासकाव्यम् 2. बालरामायणम् 3. बालभारतम् 4. कर्पूरमञ्जरी 5. विद्धसालभञ्जिका 6. काव्यमीमांसा 7. भुवनकोशः 8. अष्टपत्रदलकमलम् इत्यादीनि त्रयोदशकाव्यानि राजशेखरेण रचितानि इति आचार्य परमेश्वर दीनपाण्डेयः अभिप्रेयाय । ......(B)

एतेषु कर्पूरमञ्जरी प्राकृतभाषायां रचितं सट्टकनामकं रूपकं संस्कृतसाहित्येऽपि प्रसिद्धम् । पुरा संस्कृतप्राकृतयोः आदरः तुल्यरूपः प्रसिद्ध एव ।

## सट्टकलक्षणम् :-

नाटकलक्षणानि अलङ्कारशस्त्रे प्रसिद्धान्येव सर्वया नाटकलक्षणानुसारिणी अपि नाटिका स्त्रीपात्र प्रधाना चतुरङ्कमिता संस्कृतसाह्रित्ये प्रमिद्धैव ।

---

A. कर्पूरमञ्जरी - पीठिका - पे.जि. - नें. 10
B. कर्पूरमञ्जरी - पीटिक - पे.जि. - नें. 11

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

श्रीहर्षदेवस्य रत्नावली, प्रियदर्शिका, विश्वनाथ कविराजस्य चन्दिकापरिणयादि नाटिकाः प्रसिद्धा एव। नाटिकायां नायकः दक्षिणो भवाति तस्य ज्येष्टा पत्नी प्रियतमा आपि द्वितीयस्यां नायिकायामपि नायकः अनुरक्तो भवति। तद् ज्ञात्वा प्रथमा द्वितीयां भर्तुः गोपयितुं कृतयत्नापि अन्ते केनापि कारणेन नायके प्रसन्ना द्वितीयां स्वयं तस्मै प्रदास्यति। द्वितीयापि प्रथमायाः आश्रये एव अज्ञाता वसन्ती कैरपि कारणैः अज्ञातवासमपि करोति। तथापि नायकः तां महता प्रयत्नेन पश्यति तयोः समागमे विदूषकादयः सहायकाः भवन्ति। सट्टकेपि नाटिका लक्षणानि एव भवन्ति किन्तु प्रवेशकः विष्कम्भश्च न भवतः।(A)

लक्ष्यते नाटिकाप्यत्र सङ्कीर्णान्यनिवृत्तये।

तत्र वस्तु प्रकरणान्नाटकान्नायकोनृपः ॥

प्रख्यातो धीरललितः श्रृङ्गारोऽङ्गी सलक्षणः।

स्त्रीप्रायचतुरङ्कादि भेदकं यति चेष्यते ॥

एकद्वित्र्यङ्कपात्रदिभेदेनानन्तरूपता।

देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ ......(B)

तत् सट्टकमिति भण्यते दूरं यो नाटिकामनुहरति

किं पुनरत्र प्रवेशक विष्कम्भके केवलं न भवतः ॥

सट्टके आङ्काः यवनिका अथवा जवनिका नाम्ना व्यवहृताः भवन्ति।

## कर्पूरमञ्जरी स्वरूपम्

कर्पूरमञ्जर्यां जवनिकान्तरं इति नाम्ना चतस्रः जवनिकाः वर्तन्ते। तत्र राजा पाण्ड्याधिपः चन्द्रपालः तस्य पत्नी विक्रमलेखा। विदर्भराजः स्वकुमारीं कर्पूरमञ्जरीं चन्द्रपालाय दातुमिच्छति। किन्तु कैरपि कारणैः सः राज्यात् च्युतो भवति। भैरवानन्द नामकः शैवयोगी स्वप्रभावेण प्रथमं कर्पूरमञ्जरीं राज्ञः पुरः स्थापयति। दर्शनमात्रेण राजा तस्यामनुरक्तो भवति। ततः भैरवानन्दः अपि कर्पूरमञ्जरीमानीय विक्रमलेखायां न्यासीकृत्य कुत्रापि गतः।

द्वितीयजवनिकान्तरे मायया दृष्टायां कर्पूरमञ्जरी आसक्तः प्रेमविह्वलो भवति। विक्रमलेखा गृहे राजानं दृष्ट्वा कर्पूरमञ्जरी अपि तस्मिन् अनुरक्ता। तस्याः सखी नाम्ना विचक्षणा कर्पूरमञ्जरी केतकी पत्रे प्रेमलेखं लिखित्वा विचक्षणा हस्तेन राजानं प्रपयामास।

---

A. दशरूपकम् - तृतीयप्रकाशः - 43 - 45 स्लेकाः पे.जि. - नें. 173

B. भरतकोशः - पे.जि. - नें. 697 रचयित - मनवल्लि रामकृष्णः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

विदूषकोऽपि राजानं कर्पूरमञ्जर्यां अनुरक्तं ज्ञत्वा तयोः समागमाय कृतयत्नोऽभूत्। अत्रान्तरे ''हिण्डोला चतुर्थी '' नामकः उत्सवः विक्रमलेखया प्रवर्तितः आसीत्। तस्मिन् उत्सवे यदा कर्पूरमञ्जरी डोलामारूढा तदा तां ततोपनीय मरकतमणि गृहं नीत्वा विदूषकः तयोरन्योन्य दर्शनं कल्पयामास।

तृतीयजवनिकान्तरे विदूषकेण दृष्टः दीर्घतरः स्वप्नः राज्ञे निवेदितः। तस्मिन् स्वप्ने सः कर्पूरमञ्जरीचन्द्रपालयोः समागममपि दृष्टवान्। अत्रान्तरे कर्पूरमञ्जरी तत्रागता तस्याः वस्त्राञ्चल वातेन दीपोनिर्वापितः। तमसि नायिका नायकौ आलिङ्गनसुखमनुभवतः।

चतुर्थजवनिकान्तरे राज्ञः तीव्रो विरहः वर्णितः। राज्ञः द्वितीया पत्नी सारङ्गिका अपि राजानं डोलारोहणार्थमाहूतवती। महाराणी विक्रमलेखा भैरवानन्दात् गृहीत शिवदीक्षा तां सम्पूर्णतया निरूढवती। अत्रान्तरे कदलीगृहे अग्निः उद्भिता धूमेन सर्वत्र दृष्टिपथे रूद्धे राजा कर्पूरमञ्जरीं रहसि परिणिनाय। अत्रान्तरे भैरवानन्दः गुरुदक्षिणा रूपेण चन्द्रपालकर्पूरमञ्जर्योः विवाहमेव राज्ञिं ययाचे। राज्ञी अपि तदर्थं अङ्गीकृतवती। निर्वृत्ते विवाहे कर्पूरमञ्जरीं स्वमातुः श्वसुः पुत्रीं ज्ञात्वा आनन्दिता बभूव।

इदं चं इतिवृत्तं यद्यपि कालिदासस्य मालविकाग्निमित्रं, रत्नावली नाटिकां च अनुकरोतीव दृश्यते तथापि बहूनि नूतनानि कल्पनानि सट्टकस्यास्य वैशिष्ट्य प्रतिपादकानि दृश्यन्ते। किं बहुना अलङ्कारमूर्धन्यः मम्मटाचार्यः कर्पूरमञ्जर्याः अनेकान् श्लोकान् प्राकृतभाषायां दृष्टानपि उदाहृतवान्। एकमुदाहरणरम् वसन्तवर्णने .....(A)

जे लंकागिरिमेहलाहि खलिदा संभो अखिण्णोरई
फारप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्रणं।
ते एण्हिं मल आणिला विरहिणीणीसाससंपक्किणो
जादा झक्ति सिसुत्तणे विबद्दला तारुण्णपुण्णा वि अ॥

एतस्य संस्कृतभाषानुवादाः यथा .....(B)
ये लङ्कागिरिमेखलायां स्खलिताः संभोगखिन्नोरगी
स्फारोत्फुल्ल फणावलीकवलने प्राप्ता दरिद्रत्वम्।
त इदानीं मलयानिला विरहिणनिः श्वाससंपर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारूण्यपूर्णा इव॥

अत्र उरगीभिः अस्वादितत्वात् वायूनां क्षीणता तारुण्यपूर्णत्वं च अत्पेक्षालङ्कारः। पुनः वृद्धिप्राप्तों मधुकरी निश्वास सम्बन्धः कारणमिति समाधिरलङ्कारः।

A. कर्पूरमञ्जरी - प्रथमजवनिका - 20 स्लेकाः (प्राकृतम्)
B. कर्पूरमञ्जरी - प्रथमजवनिका - 20 स्लेकाः पे.जि. 30

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

''समाधिः कार्यसौकर्यं कारणान्तर सन्निधेः'' इति तल्लक्षणम् । शिशुत्वेपि तारुण्य पूर्णत्वात् कारणेन विना कार्यजन्म वर्णनात् विभावनालङ्कारः । एवं त्रयाणां अन्योन्यापेक्षित्वात् सङ्करः ।

**उपसंहार :-** एवं विधानि बहूनि उदाहरणानि रमणीयानि सुधीभिः स्वयं सट्टकपठनेन द्रष्टव्यानि इति अलं विस्तरेण ।

## उपयुक्तग्रन्थसूची

1. कर्पूरमञ्जरी - कृष्णदास अकाडमी - वारणासी 1983.
2. दशरूपकम् - चैखम्बा विद्याभवन - वारणासी 1967.
3. भरतकोशः - मानवल्लि रामकृष्णकवि.
   तिकमल तिरुपति देवस्थानम्, तिरुपति - 1999.